Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 6 | ISSN : 2581- 6306

# साम्प्रतिकसमाजे शङ्कराचार्याणां शिक्षणस्य प्रभावः

डॉ. दत्तहरिबेहेरा
अध्यापकः, शिक्षाशास्त्रविभागः, श्रीजगन्नाथसंस्कृतविश्वविद्यालय, पुरी ।

**Article Info**
Volume 3, Issue 6
Page Number : 180-183
**Publication Issue :**
November-December-2020
**Article History**
Accepted : 10 Dec 2020
Published : 30 Dec 2020

**शोधसारांशः**- जगत्यस्मिन् बहवः प्राणिनः निवसन्ति, तेषु तेषु प्रणीषु मानवः श्रेष्ठः भवति। मावनस्य कृते समुचित शिक्षा लभ्यते चेत् सः मानवः अन्ततोगत्वा स्वीय प्रगतेः साकं समाजस्य देशस्य राष्ट्रस्य च विकासः साधयितुं समर्थः भवति। प्राचीनकाले श्रीशङ्काचार्येण यथा उक्तं तस्य प्रभावः सम्प्रति दृश्यते। तेषां शिक्षणविधयः शिक्षायाः उद्देश्यानि बालानां मानसिक मानसिक स्तरस्य विकाससाधने सहायकमवश्यं भवति। साम्प्रतिक समाजे यद्यपि शिक्षा दीयते, तेन बुद्धेः विकासः भवत्येव परन्तु सामान्य व्यवहारादि ज्ञानस्य अभावः परिलक्षते। एतदर्थं शङ्कराचार्याणां शिक्षण पद्धति शिक्षायाः उद्देश्यानि महत्वपूर्ण स्थानामावहति। अनेन प्रकारेण श्रीशङ्कराचार्याणां शिक्षणस्य प्रभावः साम्प्रतिकसमाजे वर्तते इति प्रमाणितः अत्र नास्ति लेशोऽपि संशयास्य अवकाशः।

**मुख्यशब्दाः**- अन्ततोगत्वा, साधयितुं, उद्देश्यानि, शिक्षण, पद्धति, समाजः, शङ्कराचार्यः।

आसीत् केरलप्रदेशस्य कालडिग्रामे परमधार्मिक प्रवृत्तिपराङ्मुखः शिवभक्तः शिवगुरुरिति द्विजः। तस्य गृहे 845 तमे ख्रिस्ताब्दे श्रीशङ्कराचार्य जनिमलभत। यदाऽयं त्रिवर्षदेशीयो वभूव तदा अस्य पिता दिवंगतः। ततः प्रभृति मात्रा अयं पालितः। पञ्चवर्ष कल्पस्यस्योपनायनिको विधि कुलपुरोहितेन निवर्तितः। वाल्यादेव शङ्करेण अभूता प्रतिभा प्रदर्शिता। सर्वेषामपि आगमननिगमनादीनां सम्यग् अध्ययनं च विहितम् ।

**ब्रह्मैव सत्यं परमार्थितोऽस्ति**
**ब्रह्मैव जीवः जगदस्ति मिथ्या।**
**श्रुतिं प्रमाणं कथयन्तमार्यं**
**श्रीशङ्करं नौमि महेशमीशम् ॥**

शैशवे एव शङ्करः सन्यासकामोऽभवत्। परं माता एनं सन्यासाय नानुमन्यते स्म। मातस्तुतिं प्राप्तुकामः शंकर एकदा नदीमवगाहमानः तीरस्थां मातरं तारस्वरणाह्वयत– **"नक्रेणाहं दृढं गृहितोऽस्मि, तद् यदि सन्यासाय नानुमन्यसे तर्हि अयं मोक्षति माम्"।** मातापि सुतस्य प्राणरक्षां चिन्तयती सन्यासं तस्य अनुमने। अनन्तरं दशवर्षीयशङ्करः ब्रह्मज्ञानप्रतिष्ठायै भारतभ्रमणं प्रारभत।

शङ्कराचार्याणां दर्शनं भवति वेदान्तदर्शनम्। वेदान्तशास्त्रे आत्मस्वरूपं प्रतिपाद्यते इति हेतोः मुमुक्षुः वेदान्तशास्त्रपठनश्रवणमनन आदिषु प्रवृत्तो भवति। तस्मात् एतत् शास्त्रं सर्वेषां शास्त्राणां शिरोमणिभूतं भवति। अत्र "ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इति विचारः मुख्यः भवति। विषयेऽस्मिन् बहवः विप्रतिपत्योः वर्तन्ते। तथा च

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

वेदान्तानुसारं मायाया: शक्ति द्वयं भवति । तद्यथा आवरणविक्षेपनामकम्। आवरणशक्ति: ब्रह्मण: शुदुस्वरूपम् आवृणोति। विक्षेपशक्तिश्च तत्र आकाशादि प्रपञ्चं सृजति। मायैव अविद्या-अज्ञान-अध्यास-अध्यारोप-विवर्तादि शब्दैर्व्यवह्रीयते इति शङ्कर:।

**शिक्षा-** श्रीशङ्कराचार्याणामनुसारं मानव: प्राधान्येन भौतिकप्रपञ्चे अथवा मानसिक प्रपञ्चे निवसति। भौतिकप्रपञ्चमानुभाविकप्रपञ्च नाम्ना प्रसिद्धं वर्तते। मानसिकप्रपञ्चे आध्यात्मिक भावनाया: कृते अधिक प्राधान्यं भवति। अतएव अस्य नाम आध्यात्मिक प्रपञ्च इति वर्तते। आध्यात्मिक स्वभावेनैव मानव: इतरप्राणीभ्य: सर्वोत्कृष्ट: जात:, अतएव शारीरिक आवश्यकता अपेक्षया मानसिक अपेक्षानां कृते अधिकं प्राधान्यं प्रयच्छन्ति। "सत्यं शिवं सुन्दरम्" इति भावनाया कृते महती प्राधान्यता प्रदीयते। आत्मसाक्षात्कार माध्यमेन मोक्ष: सम्पादनीय: इति। अध्यात्मविद्या श्रेष्ठ विद्यारूपेण एतै परिगण्यन्ते।

**इस्यावास्यमिदं सर्वं यत्किञ्चितयत्किञ्चित् जगत्यां जगत् ।**

**तेन त्यक्तेन भूञ्जिथा मा द्विधा कस्यञ्चित् धनम् ॥**

**अहम् ब्रह्मोऽस्मि सोऽयमात्मा ब्रह्मा तत्त्वमसि, प्रज्ञानां ब्रह्मा ।**

**आत्मावारे द्रष्टव्यो श्रोतव्यो मन्तव्यो निदिध्यासितव्य: ।**

**असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्यों अमृतगमय: ॥**

**शिक्षणम् -** प्राचीन कालादारभ्य अद्यावधि मानव: सभ्यताया: विकासाय समये समये शिक्षायामपेक्षितं परिवर्तनमानेतुं सततप्रयतमानो दृश्यते। शैक्षिकविकास: मानवसमाजस्य विकासाय प्रमुखं कारकं भवति। अत: मानव प्रगते मानदण्ड: शिक्षा इति कथ्यते। छात्राणां भिन्नभिन्नविषयाणामवगमनार्थं सर्वाङ्गीण विकासार्थं च विद्यालयेषु अध्यापकेन क्रियमाण प्रक्रिया शिक्षणमुच्यते। शिक्षार्थीनां व्यवहारपरिवर्तनाय विद्यालय भिन्नस्थलेषु विद्यालयेतरसमयेषु च निरन्तर जायमानप्रक्रियापि शिक्षणमिति पदेनाभिधीयते। शिक्षणमेका नरन्तरप्रवाहमानाजीवनव्यापिनी प्रक्रिया। व्यक्ते: आजन्माद् आरभ्य मृत्युपर्यन्तम् अविच्छिन्नतया सरतीयं प्रक्रिया। अपि च शिक्षणं काचन अन्त: प्रक्रिया या छात्र-शिक्षकयोर्मध्ये विशेषकार्यार्थं चाल्यते। इयं काचित् विकासात्मिका प्रक्रिया भवति। यथा प्रक्रियया बालानां विकासं कारयित्वा तेषां व्यवहारे अपेक्षित परिवर्तनं सम्पाद्यते। यद्यपि प्रगतिशीलराष्ट्रे शिक्षणस्य प्रभाव: दृश्यते तथापि प्रगतेन्त: विनाशस्य मूलं निहितं भवति। परन्तु मानव: भौतिक प्रपञ्चे स्वीय स्वार्थपुरणार्थम् आगामी भविष्यतं ध्वंसाभिमुखीं कारयति। आध्यात्मिक शिक्षया बाल: संस्कारितो भूत्वा सुसमाजं निर्माति स्म। तेन न केवलं स्वीय विकास: अपि च समाजस्य विकास: शान्तिपूर्ण वातावरणं निर्मियते स्म। अद्यतनीय समान: कलुषित: दृश्यते प्राच्यदर्शनं शिक्षां परित्यज्य पाश्चात्यं प्रति आकर्षितो भूत्वा संस्कारं त्यजति। समाजेऽस्मिन् सुखाभिलाषि मानव: क्षणिक सुखाय सम्पूर्ण जीवनं नर्के एव निक्षिपति। येन बहव: रोगा: जायन्ते। पर्यावरणं कलुषितं भवति। प्रदूषित पर्यावरणे शिक्षाया: कुप्रभाव: दृश्यतैव। शङ्कराचार्याणां शिक्षाया: प्रभाव: यद्यपि वर्तते ततोधिक मात्रेण पाश्चात्य शिक्षाया: प्रभाव: दृश्यते । यतोहि ब्रह्मानन्द रूपापेक्षा भौतिक सुखं सरलं सौविध्यं भवति। परन्तु मानव: न जानाति किं चिरन्तनं नित्यं सुखं दास्यति किञ्च क्षणिकमनित्यमिति। अपि च संसारे केचन सन्ति ये अद्वैतवादमनुसरन्ति, आध्यात्मिकं प्रति आकर्षित: भवन्ति। साम्प्रतिकसमाजं प्रति श्लोकोऽयं वर्तते यत् -

**बालस्तावत् क्रीडाशक्त:**

**तरूणस्तावत् तरूणीशक्त:।**

**वृद्धस्तावत् चिन्ताशक्त:**

**परमेब्रह्मणि कोऽपि न शक्त: ॥**

श्रीमद् शङ्कराचार्याणामुक्तिरियं साम्प्रतिकसमाजे दरीदृश्यते। अर्थात् वर्तमानकाले बालात् नीत्वा बृद्धं यावत् सर्वे विषयाभिमुखीः भवन्ति । परमे ब्रह्मणि आशक्तः मानवानामभावः दृश्यते। बालः क्रीडितुमाशक्तः भवति। पुनः यदा किशोरसमये पदार्पणं कृत्वा यौवने प्रविशति तदानीं तरूणीं प्रति आशक्तिं प्रदर्शयति वृद्ध काले चिन्तामग्नः भवति। अनेन प्रकारेण कालः गच्छति परन्तु ब्रह्मानन्दस्वरूपं कोऽपि न पश्यति। वेदान्त दर्शनानुसारं शिक्षायाः प्रमुखमुद्देश्यं भवति ब्रह्मसाक्षात्कारः एवञ्च विद्ययाऽमृतमश्नुते। इति इशवास्योपनिषद बाक्ये विद्याशक्तेन परमब्रह्मविद्या एव विवक्षिता। तैतरीयोपनिषदि सा विद्या या विमुक्तये इति दृश्यते।

**शिक्षोद्देश्यानि** -वेदान्तदर्शनानुसारं शिक्षायाः प्रमुखमुद्देश्यं भवति ब्रह्मसाक्षात्कारः। एवञ्च विद्ययाऽमृतमश्नुते इति इशावास्योपनिषद् वाक्ये विद्याशब्देन परब्रह्मविद्या एव विवक्षिता। औपनिषद्दर्शनानुसारं परब्रह्मविद्यया (आत्मज्ञानेनैव) परमपुरुषार्थस्य मोक्षप्राप्तिः। अमृतशब्देन भरणरहिताऽवस्था मोक्षप्राप्तिरेव सूचिता। तथा च परब्रह्मज्ञानेनैव मोक्षप्राप्तिरिति श्रुतिवाक्यस्यास्य तात्पर्यम् पुनरपि तैतरीयोपनिषदि 'सा विद्या या विमुक्तये' इति दृश्यते। विद्या नाम मोक्षप्राप्त्यर्थं साधनम् उपकारिणी वा उच्यते। विमुक्तिर्नाम आत्यन्तिकमोक्षः उपर्युक्त वचनानुसारं ज्ञायते यत् वेदान्तानुसारं शिक्षायाः परम उद्देश्यं भवति ब्रह्मसाक्षात्कारः इति।

1. बालकेषु आध्यात्मिकभावनायाः विकाससम्पादनं, बालके पूर्वमेव विद्यमानस्य दैवात्मस्वरूपस्य अभिव्यञ्जन सम्पादनञ्च।
2. शरीर मन आत्मना मध्ये सन्तुलितरूपेण सर्वाङ्गीणविकास सम्पादनञ्च।
3. पशुतुल्य व्यवहारस्थाने मानवोचितव्यवहारसम्पादनं सत्यं शिवं सुन्दरमिति भावनायाः विकास सम्पादनम् अन्यदुद्देश्यं भवति ।

**पाठ्यचर्या**- अद्वैतवेदान्ते **'ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः'** इति परमसिद्धान्ते सति स्वीकृते 'जन्माद्यस्य यतः' इति सूत्रेण यतो वा इमानि भूतानि जायन्ते। इत्यादि श्रुतिवाक्यैश्च जगदुपादानत्वे ब्रह्मणिसिद्धान्तेन च । कथमस्य मिथ्याप्रपञ्चस्य उपादानत्वं सत्यस्वरूप ब्रह्मणः युज्यते इति युक्ति सह प्रश्नस्योपपत्तिः। तन्निवारणाय सत्तायाः त्रैविध्यं उपपादयन्ति अद्वैताचार्याः प्रातिभासिक व्यावहारिक-पारमार्थिक भेदेन।

**शिक्षणविधिः**-सच्चिदानन्द स्वरूप ब्रह्मणः अधिगमः छात्रस्य भवतु इति कामयते शिक्षकः। तदर्थं शिक्षणविधीनां साहाय्यं स्वीकरोति अध्यापकः। तत्र मुख्यरूपेण विधि द्वयस्य उपयोगं करोति। तत्त्व अध्यारोपविधिः, अपवादविधिस्व । अध्यारोपे वस्तुनः अवस्तुनः च आवश्यकता वर्तते। रजौ सर्पस्य अध्यारोपः भवति चेत् रज्जु वस्तु भवति। सर्पः तु अवस्तु भवति। एवमेव ब्रह्मणि जगतः अध्यारोपः भवति। चेत् ब्रह्मवस्तु भवति जगत् तु अवस्तु भवति । अनेन विधिना शिक्षकः छात्रसमक्षं इदमुपस्थापयति यत् - आत्मा एव शरीरं, आत्मा एव बुद्धिः, आत्मा एव अन्तःकरणं तथा आत्मा एव समर्थ पदार्थः इति । अनेन विधिना अवस्तुनि वस्तुनः ब्रह्मणि जगतः च अध्यासः क्रियते।

अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद् वस्तुविवर्तस्यावस्तुनोऽज्ञानदेः प्रपञ्चस्य वस्तुमात्रत्वम्। अनेन विधिना तर्ककौशल्या युक्ता च क्रमशः इदं सिद्धं क्रियते यत् आत्मा न तु शरीरं न मनः न वा बुद्धिः न तु पदार्थः किन्तु एतदतिरिच्य भिन्नपदार्थ भवति इति।

**गुरुशिष्य सम्बन्धः** - आचार्य शिष्ययोः पितापुत्रवत् सम्बन्ध आसीत् इति वक्तुं शक्यते। उपनयनसंस्कारेण शिष्यस्य गुरोः समीपनिवासाद् अन्तेवासित्वं संजायते।

**आचार्यः पूर्वरूपम् । अन्तेवास्युत्तरूपम् ।**

**विद्या संधिः। प्रबचनं सन्धावम्** ।

**अनुशासनम्** - वेदान्त–दर्शने अनुशासित जीवनस्य कृते महत्वं दीयते। संस्कारेण बालकः अनुशासिते भवति। एवञ्च वेदान्ते बाल–प्रकृतिमनुसृत्य चत्वारि प्रकाराणि अनुशासनानि भवन्ति। तद्यथा –

**1**.क्षिप्तः, **2**.विक्षिप्तः, **3**. मूढा, **4**.एकाग्रताश्च ।

अनेन प्रकारेण श्रीशङ्कराचार्याणां शिक्षणस्य प्रभावः साम्प्रतिकसमाजे वर्तते इति प्रमाणितः अत्र नास्ति लेशोऽपि संशयास्य अवकाशः।

**सन्दर्भग्रन्थसूची –**


1. ब्रह्मसूत्रशाङ्करभाष्यम् – जगद्गुरू शङ्कराचार्यः – चौखम्बा पब्लिकेसन्।
2. वेदान्तदर्शनम् – श्रीशङ्कराचार्यः – गीताप्रेस गोरखपुर।
3. शङ्कर एवं रामानुज दर्शन – डा. पानो कुमारी ।
4. सर्वदर्शनसंग्रह एवं शङ्करदर्शन – डा. पङ्कज कुमार मिश्र, परिमल पब्लिकेशन्स।
5. वेदान्तदर्शन – पं.श्रीरामशर्मा – युगनिर्माण योजना विस्तार ट्रष्ट, मथुरा ।